348sk08

८

मोहमुद्गरः रामगुणकीर्तनं च

प्रस्तावना

सर्वेषु दर्शनेषु अत्यन्तं प्रसिद्धम् उत्कृष्टतमं च अद्वैतदर्शनम्। दर्शनं नाम किमिति प्रश्नस्य उत्तरं तावद् दृश्यते अनेन इति दर्शनम् इति। दृश्यते साक्षात्क्रियते अनुभूयते मूलतत्त्वम् अनेन इति दर्शनमिति दृश्-धातोः करणार्थे ल्युट्प्रत्यये दर्शनशब्दो निष्पन्नः। अद्वैतदर्शनस्य मूलं तत्त्वं भवति "सर्वं खल्विदं ब्रह्म" इति। अर्थाद् यत्किञ्चित्सर्वमेव ब्रह्म। इदं हि जगत् ब्रह्मणः विवर्तभूतं यथा रज्ज्वां सर्पभ्रमे सर्पः रज्जोः विवर्तभूतः भवति। वस्तुतः तत्र रज्जुरेवास्ति किन्तु सर्पः दृश्यते, एवमेव वस्तुतः सर्वं ब्रह्मैव। जीवस्तु अज्ञानोपहितं ब्रह्म। जीवब्रह्मणोरैक्यस्य अपरोक्षानुभूतिः एवास्य अद्वैतदर्शनस्य मूलम्। अद्वैतदर्शनस्य आचार्येषु मूर्धन्यतां भजन्ते परमपूज्यचरणाः श्रीशङ्कराचार्याः। ते भाष्यग्रन्थानां प्रणयनेन अद्वैतसिद्धान्तान् प्रतिष्ठापितवन्तः। तद्विरचितम् उपनिषद्भाष्यं ब्रह्मसूत्रभाष्यं गीताभाष्यं च अद्वैतवेदान्तस्य स्तम्भरूपम्। ते न केवलं भाष्यविरचनेन अपि तु स्तोत्रमाध्यमेन अपि अद्वैतवेदान्तम् उपदिष्टवन्तः। तद्विरचितेषु स्तोत्रेषु अन्यतमं भवति द्वादशपञ्जरिकास्तोत्रम्। तस्यैव मोहमुद्गरः इत्यभिधानम्। अत्र आचार्याणां श्लोकसंरचने अतीव सुललिता सरला च शैली दृश्यते। एतादृश्या सरलया सुललितया शैल्या एव ते अद्वैतसिद्धान्तान् स्तोत्रे अस्मिन् प्रतिपादितवन्तः। अस्य स्तोत्रस्य श्लोकानाम् सरलवाक्यैः अन्वयार्थज्ञानम् अस्मिन् पाठे भविष्यति।

यस्य जनस्य कृत्याकृत्यविवकः अस्ति स एव संसारे परां प्रतिष्ठां प्राप्नोति। कृत्याकृत्यविवेकवत्सु सदाचारपरायणेषु सत्यनिष्ठेषु जनेषु मूर्धन्यतां भजते पुरुषोत्तमः श्रीरामचन्द्रः। तस्य जीवनं यद्यपि विपन्मुक्तं नासीत् परन्तु स कदापि सत्यवादितां न त्यक्तवान्। कथं जीवने स्थेयम् इत्यस्मिन् विषये तस्य आचरणमेव प्रमाणम्। तस्मात् तस्य अमरं चरितम् आश्रित्य महाकविः बाल्मीकिः रामायणम् इति महाकाव्यं विरचितवान्। आदिकविः बाल्मीकिः, अतः रामायणम् आदिकाव्यम् इति प्रसिद्धम्। रामायणस्य सप्त काण्डानि भवन्ति - बालकाण्डम्, अयोध्याकाण्डम्, अरण्यकाण्डम्, किष्किन्धाकाण्डम्, सुन्दरकाण्डम्, युद्धकाण्डम् उत्तरकाण्डं चेति। तेषु काण्डेषु अरण्यकाण्डे श्रीरामचन्द्रस्य गुणवर्णना बाल्मीकिना विहिताः। येषु श्लोकेषु श्रीरामचन्द्रगुणवर्णना संवृत्ता तेषु केचन चिताः श्लोकाः अस्मिन् पाठे स्वीकृताः। तेषे श्लोकेषु वर्णितां श्रीरामचन्द्रगुणवर्णनाम् अस्मिन् पाठे पश्यामः।



उद्देश्यानि

अमुम् पाठं पठित्वा भवान् -

- स्तोत्रसाहित्यं जानीयात्।
- मोहमुद्गरः इति स्त्रोत्रमाध्यमेन अद्वैतवेदान्ततत्त्वानि जानीयात्।
- श्रीरामगुणवर्णना इत्यंशस्य अध्ययनेन रामचन्द्रस्य गुणान् जानीयात्।
- श्लोकानाम् अन्वयार्थः समासं च ज्ञातुं शक्नुयात्।
- विविधान् नूतनान् शब्दान् जानीयात्।
- विविधशब्दानाम् प्रयोगस्थलानि ज्ञात्वा स्वयं भाषाव्यवहारे तेषां शब्दानाम् उचितं प्रयोगं कर्तुं शक्नुयात्।

मोहमुद्गरस्तोत्रम्

८.१) सम्पूर्णः मूलपाठः - मोहमुद्गरस्तोत्रम्

भज गोविन्दं भज गोविन्दं गोविन्दं भज मूढमते।
सम्प्राप्ते सन्निहिते मरणे नहि नहि रक्षति डुकृञ् करणे।। १।।
मूढ जहीहि धनागमतृष्णां कुरु सद्बुद्धिं मनसि वितृष्णाम्।
यल्लभसे निजकर्मोत्पात्तं वित्तं तेन विनोदय चित्तम्।। २।।
अर्थमनर्थं भावय नित्यं नास्ति ततः सुखलेशः सत्यम्।
पुत्रादपि धनभाजां भीतिः सर्वत्रैषा विहिता नीतिः।। ३।।
का ते कान्ता कस्ते पुत्रः संसारोऽयमतीव विचित्रः।
कस्य त्वं कः कुतः आयातस्तत्त्वं चिन्तय यदिदं भ्रातः।। ४।।
मा कुरु धनजनयौवनगर्वं हरति निमेषात्कालः सर्वम्।
मायामयमिदमखिलं हित्वा ब्रह्मपदं त्वं प्रविश विदित्वा।। ५।।
कामं क्रोधं लोभं मोहं त्यक्त्वात्मानं भावय कोऽहम्।
आत्मज्ञानविहीना मूढास्ते पच्यन्ते नरकनिगूढाः।। ६।।
सुरमन्दिरतरुमूलनिवासः शय्या भूतलमजिनं वासः।
सर्वपरिग्रहभोगत्यागः कस्य सुखं न करोति विरागः।। ७।।
शत्रौ मित्रे पुत्रे बन्धौ मा कुरु यत्नं विग्रहसन्धौ।
भव समचित्तः सर्वत्र त्वं वाञ्छस्यचिराद्यदि विष्णुत्वम्।। ८।।

त्वयि मयि चान्यत्रैको विष्णुर्व्यर्थं कुप्यसि मय्यसहिष्णुः।
सर्वस्मिन्नपि पश्यात्मानं सर्वत्रोत्सृज भेदज्ञानम्।। ९।।
प्राणायामं प्रत्याहारं नित्यानित्यविवेकविचारम्।
जाप्यसमेतसमाधिविधानं कुर्ववधानं महदवधानम्।। १०।।
नलिनीदलगतसलिलं तरलं तद्वज्जीवितमतिशयचपलम्।
विद्धि व्याध्यभिमानग्रस्तं लोकं शोकहतं च समस्तम्।। ११।।
का तेऽष्टादशदेशे चिन्ता वातुल तव किं नास्ति नियन्ता।
यस्त्वां हस्ते सुदृढनिबद्धं बोधयति प्रभवादिविरुद्धम्।। १२।।
गुरुचरणाम्बुजनिर्भरभक्तः संसारादचिराद् भव मुक्तः।
सेन्द्रियमानसनियमादेवं द्रक्ष्यसि निजहृदयस्थं देवम्।। १३।।
द्वादशपञ्जरिकामय एष शिष्याणां कथितो ह्युपदेशः।
येषां चित्ते नैव विवेकस्ते पच्यन्ते नरकमनेकम्।। १४।।

८.२) साम्प्रतं मूलपाठमवगच्छाम (मोहमुद्गरः) - १

भज गोविन्दं भज गोविन्दं गोविन्दं भज मूढमते।
सम्प्राप्ते सन्निहिते मरणे नहि नहि रक्षति डुकृञ् करणे।। १।।
मूढ जहीहि धनागमतृष्णां कुरु सद्बुद्धिं मनसि वितृष्णाम्।
यल्लभसे निजकर्मोत्पात्तं वित्तं तेन विनोदय चित्तम्।। २।।
अर्थमनर्थं भावय नित्यं नास्ति ततः सुखलेशः सत्यम्।
पुत्रादपि धनभाजां भीतिः सर्वत्रैषा विहिता नीतिः।। ३।।
का ते कान्ता कस्ते पुत्रः संसारोऽयमतीव विचित्रः।
कस्य त्वं कः कुतः आयातस्तत्त्वं चिन्तय यदिदं भ्रातः।। ४।।

अन्वयार्थः -

सन्निहिते समीपे मरणे मृत्यौ सम्प्राप्ते प्राप्तौ अपि नहि नहि नैव केनापि प्रकारेण डुकृञ् करणे व्याकरणादिशास्त्रज्ञानं रक्षति परमपदं प्रापयति। तस्मात् हे मूढमते मूढा मतिर्यस्य स मूढमतिः, तस्य सम्बोधने मूढमते विवेकविहीने गोविन्दं परमेश्वरं भज आराधय, गोविन्दं परमेश्वरं भज आराधय, गोविन्दं परमेश्वरं भज आराधय।१।



मूढ हे विवेकहीन, धनागमतृष्णां धनस्य अर्थस्य आगमरूपां तृष्णाम् आशां जहीहि परित्यज। सद्बुद्धिं सच्चिन्तनं कुरु सम्पादय, मनसि मानसे वितृष्णां विषयेभ्यः वैराग्यं कुरु सम्पादय। यत् यथावत् निजकर्मोत्पात्तं निजकर्मणा स्वबलेन उपात्तम् उपार्जितं वित्तं धनं लभसे प्राप्नोषि तेन तावता एव चित्तं मनः विनोदय आनन्दय।२।

अर्थं वित्तम् अनर्थं विपदः कारणम् इति नित्यं सर्वदा भावय चिन्तय। यतो यस्मात् कारणात् ततः तस्माद् वित्तात् सुखलेशः अपि सुखस्य आभासः अपि नास्ति न भवति इति सत्यं यथार्थमेव। तत्र कारणं कथयति - पुत्राद् अपि आत्मजाद् अपि धनभाजां धनिकानां भीतिः "अयं पुत्रः मे मम सर्वस्वम् अपहरेत्" इत्यादिभयं भवति। सर्वत्र सर्वस्मिन् स्थले एषा नीतिः अयम् आचारः विहिता आचारः ज्ञायते। ३।

ते तव का कान्ता भार्या का। ते तव कः पुत्रः सुतः। अयं संसारः दृश्यमानः क्षणस्थायी प्रपञ्चः अतीव अत्यन्तं विचित्रः अद्भूतः। त्वं कस्य कः। कुतः कस्मात् स्थानात् आयातः आगतवान् (इति ज्ञातुं शक्नोषि) यद् इदं तत्त्वं यथार्थभूतं तद् भ्रातः हे सखे चिन्तय विचारय।४।

व्याख्यानम् -

अस्मिन् स्तोत्रे प्रथमः श्लोकः ध्रुवपदम्। अर्थात् प्रत्येकात् श्लोकात् परम् अस्य श्लोकस्यावृत्तिः भवति। अत्र शङ्करभगवत्पादाः कथयन्ति यत् - यदा मरणं समीपम् आगच्छति तदा न्यायव्याकरणादीनां संसारिकतत्त्वपूर्णशास्त्रानां ज्ञानेन मुक्तिः नैव भवति। यतो हि एतेषां ज्ञानेन केवलं कुतर्काय मतिः भवति। एतेन परमप्रियः मोक्षः नैव जायते। एतादृशशास्त्रेषु अनित्यपदार्थानां विषये एव चर्चा विहिता। तस्मात् हे अज्ञानिमनुष्य, यदि त्वं संसारिकदुःखात् मुक्तिं प्राप्तुम् इच्छसि तर्हि गोविन्दस्य परमेश्वरस्य भजनं कीर्तनं वा कुरु।१।

धनं कामं च न हि उपभोगेन समाप्तिं गच्छति, परन्तु उत्तरोत्तरं वर्धते एव। अत एव महाभारते प्रसिद्धोक्तिः -

"न जातु कामः कामानामुपभोगेन शाम्यति।

हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते।।" इति।

तस्मात् धनागमस्य तृष्णा परित्यज्या। यतो हि धनस्य तृष्णा विषयेभ्यः मनः परमात्मनि स्थापयितुम् अवकाशं न ददाति। सच्चिन्तनेन मनसः मालिन्यं क्षीयते। तस्मात् सद्बुद्धिः करणीया। किञ्च मनसि विषयेषु वैराग्यं सम्पादनीयम्। यतो हि विषयवैराग्यं विना मुक्तिः न भवति। वस्तुतः अत्र शमस्य प्रतिपादनं विहितम्। शमः नाम ज्ञानसाधनानि यानि श्रवणमनननिदिध्यासनानि तेभ्यः भिन्नविषयेभ्यः अन्तरिन्द्रियस्य मनसः निग्रहः।

अपि च स्वयं सत्कर्मणा यत् प्राप्नोति तेनैव धनेन यावत् चित्तविनोदनं नाम स्वकीयाभिलाषपूरणं करणीयम्। अपरस्य धनं दृष्ट्वा ईर्ष्या न करणीया। अथवा अपरस्य धनम् ऋणरूपेण स्वीकृत्य भोगादिकं नैव कर्तव्यम् इति तात्पर्यम्। अतः गोविन्दं भज इति।२।

अर्थः सर्वदा अनिष्टमेव सम्पादयति। अत एवोच्यते सुभाषितम् -

"अर्थस्यार्जने दुःखमर्जितानां च रक्षणे।

आये दुःखं व्यये दुःखं कथमर्थः सुखावहः।।" इति।

अर्थात् सुखं न भवति। यतो हि अर्थस्य प्राचुर्यं यदा भवति तदा मनसि शान्तिः न भवति। लोके एवं दृश्यते यत् यः अधिकधनवान् तस्य स्वस्य पुत्रे भार्यायां वा विश्वासं न करोति। स बिभेति यत् तस्य पुत्रः भार्या वा सर्वस्वम् अपहरेत् इति। तस्मात् अर्थेन सुखं नास्त्येव। अतः गोविन्दं भज इति।३।

जगति विद्यमानः सम्बन्धः क्षणिक एव। इयं मे कान्ता अयं मे पुत्रः इत्यादिकं सर्वविधं सम्बन्धज्ञानं मिथ्याभूतम् एव। अयं दृश्यमानः संसारः अतीव विचित्रः भवति। यतो हि इयं मे कान्ता पुत्र इत्यादिकं ज्ञानं यद्यपि मिथ्याभूतं तथापि अयं संसारः सत्यत्वेन एतत्सर्वम् अस्माकं पुरतः समुपस्थापयति। अतः अहं कः अस्मि, अहं कस्माद् आगतः एतत्सर्वं यदि ज्ञातव्यं तर्हि गोविन्दं भज इति।४।

पाठगतप्रश्नाः-१

१. सन्निहिते मरणे किं न रक्षति।

२. मूढेन किं त्यक्तव्यम्।

३. कथमर्थः अनर्थः भवति।

४. केन चित्तं विनोदनीयम्।

५. सर्वत्र का नीतिःविहिता।

६. संसारः विचित्रः कथम्।

८.३) साम्प्रतं मूलपाठमवगच्छाम (मोहमुद्गरः) - २

मा कुरु धनजनयौवनगर्वं हरति निमेषात्कालः सर्वम्।

मायामयमिदमखिलं हित्वा ब्रह्मपदं त्वं प्रविश विदित्वा।। ५।।

कामं क्रोधं लोभं मोहं त्यक्त्वात्मानं भावय कोऽहम्।

आत्मज्ञानविहीना मूढास्ते पच्यन्ते नरकनिगूढाः।। ६।।

सुरमन्दिरतरुमूलनिवासः शय्या भूतलमजिनं वासः।

सर्वपरिग्रहभोगत्यागः कस्य सुखं न करोति विरागः।। ७।।

शत्रौ मित्रे पुत्रे बन्धौ मा कुरु यत्नं विग्रहसन्धौ।

भव समचित्तः सर्वत्र त्वं वाञ्छस्यचिराद्यदि विष्णुत्वम्।। ८।।

अन्वयार्थः -

धनजनयौवनगर्वं धनेषु मनुष्येषु स्वस्य यौवनावस्थायाम् अपि गर्वम् अहङ्कारं मा नैव कुरु विधेहि। यतो हि कालः महाकालः निमेषात् हठात् एव सर्वं समस्तं हरति अपहरति विनाशयति वा। त्वं सखे इदं व्यापृतम् अखिलं समस्तं मायामयं जगत् हित्वा त्यक्त्वा विदित्वा आत्मज्ञानं प्राप्य "अहं ब्रह्मास्मि" इति अनुभूय ब्रह्मपदं ब्रह्मस्वरूपं प्रविश मोक्षाख्यं परमपुरुषार्थं प्राप्य मुक्तः भव। तत्साधनाय त्वं गोविन्दं भज इति।५।

कामं वासनां क्रोधं द्वेषं लोभम् अभिलाषां मोहं प्रीतिं त्यक्त्वा वर्जयित्वा अहं कः इति आत्मानं स्वं भावय चिन्तय। ये आत्मज्ञानविहीनाः आत्मनः ज्ञानं येषां न वर्तते ते मूढाः अविवेकिनः नरकनिगूढाः नरके बद्धाः सन्तः पच्यन्ते अहरहः दुःखं प्राप्नुवन्ति इति। अतः दुःखात् मुक्तये गोविन्दं भज।६।

सुरमन्दिरतरुमूलनिवासः सुरमन्दिरे देवालये वा तरुमूले वृक्षस्य अधः वा निवासः अवस्थानम्, भूतलं पृथिवी शय्या शयनस्थानम्, अजिनं मृगचर्म वासः वस्त्रम्। सर्वपरिग्रहभोगत्यागः सर्वेषां परिग्रहाणां विषयाणां भोगस्य त्यागः। तेषु विरागः वैराग्यं कस्य मनुष्यस्य सुखम् आनन्दम् न करोति, सर्वस्यैव मनुष्यस्य सुखं करोति एव इत्यर्थः।७।

यदि अचिराद् शीघ्रमेव विष्णुत्वं सर्वव्यापित्वं ब्रह्मस्वरूपं वाञ्छसि प्राप्तुम् इच्छसि तर्हि शत्रौ अरौ, मित्रे सुहृदि, पुत्रे सुते बन्धौ स्वजने च विग्रहसन्धौ युद्धमेलने च यत्नं प्रयत्नं मा नैव कुरु विधेहि। सर्वत्र त्वं समचित्तः समानमनस्कः भव तथाभूतः भूत्वा तिष्ठ इति।८।

व्याख्यानम् -

धनम् अनुचराः स्वस्य यौवनावस्था च पद्मपत्रे स्थितं पयः इव क्षणस्थायि। तस्मात् एषु विषयेषु कदापि गर्वः नाम आत्मत्वबुद्धिः दम्भश्च न करणीयः। यतो हि सर्वं कालस्य अधीने एव वर्तते। कालः स्वेच्छया एकस्मिन् क्षणे सृजति परस्मिन् क्षणे एव नाशयति च। तस्मात् सखे, मिथ्यामायावृतम् इदम् अखिलं जगत् त्यक्त्वा ब्रह्मानन्दं प्राप्तुम् आत्मज्ञानं लभस्व। तत्प्राप्त्यर्थं त्वं गोविन्दं भज इत्यर्थः।५।

सम्पूर्णः अयं संसारः कामक्रोधादिपरिपूर्णः। कामो नाम स्त्रीधनादीनाम् उपभोगेच्छा, विद्वेषः अभिलाषः, लोभः मोहः इत्येतत्सर्वम् अनित्यम् एव। तस्मात् एतत् सर्वं त्यक्त्वा सर्वदा विचारणीयं यत् अहं कः नाम मम स्वरूपं किम् इति। यतो हि ये आत्मानं न जानन्ति ते प्रत्यहं नरके यथा दुःखं भवति तथा दुःखं प्राप्नुवन्ति। तस्मात् दुःखात् परित्राणं प्राप्तुं गोविन्दं भज इत्यर्थः।६।

भोगवासनादिकं त्यक्त्वा धनादौ लोभं च परित्यज्य मन्दिरे वृक्षस्य अधः वा शयने भूमौ अवस्थाने किञ्च मृगचर्मणः परिधाने वित्तलोभादीनां कष्टं नैव सोढव्यं भवति। एवमेव यः किमपि न स्वीकरोति भोगादिकं त्यजति किञ्च तस्य भोगविषयेषु वैराग्यं भवति स एव वस्तुतः सुखी। तस्मात् सुखं प्राप्तुं गोविन्दं भज इत्यर्थः।७।

शत्रुमित्रादयः मिथ्याभूताः एव। शत्रुणा सह युद्धेन, मित्रेण सह सख्येन, पुत्रे वात्सल्येन, तथा बन्धुना सह आलापेन समयः नष्टः भवति। तस्मात् तत्र यत्नः समयव्ययः न करणीयः। सर्वत्र सुखे दुःखे

द्वन्द्वे अनुरागे यः समानरूपेण तिष्ठति स एव विष्णुत्वम् अर्थात् मोक्षं प्राप्नोति। एतस्मिन्नेव प्रसङ्गे गीतायां भगवता कृष्णेन स्थितधीलक्षणं प्रोक्तम् -

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते।। इति।

स्थितधिया एव मोक्षः प्राप्यते। तादृशस्य मोक्षस्य लाभाय परमेश्वराराधनं कार्यम् इत्यर्थः।८।

पाठगतप्रश्नाः-२

७. कस्य गर्वः कथं नैव करणीयः।
८. किं किं त्यक्त्वा आत्मनः चिन्ता कर्तव्या।
९. कथं तिष्ठति चेत् जनः विरागसुखं लभते।
१०. किं सर्वस्य सुखं करोति।
११. कुत्र यत्नः न करणीयः।
१२. विष्णुत्वप्राप्तये किं कार्यम्।

८.४) साम्प्रतं मूलपाठमवगच्छाम (मोहमुद्गरः) - ३

त्वयि मयि चान्यत्रैको विष्णुर्व्यर्थं कुप्यसि मय्यसहिष्णुः।
सर्वस्मिन्नपि पश्यात्मानं सर्वत्रोत्सृज भेदज्ञानम्।। ९।।
प्राणायामं प्रत्याहारं नित्यानित्यविवेकविचारम्।
जाप्यसमेतसमाधिविधानं कुर्ववधानं महदवधानम्।। १०।।
नलिनीदलगतसलिलं तरलं तद्वज्जीवितमतिशयचपलम्।
विद्धि व्याध्यभिमानग्रस्तं लोकं शोकहतं च समस्तम्।। ११।।

अन्वयार्थः -

हे सखे त्वयि तव अन्तः, मयि मम अन्तश्च अन्यत्र सर्वत्रैव एकः विष्णुः एकं ब्रह्म वर्तते। ततः व्यर्थम् अकारणं त्वम् असहिष्णुः असहमानः सन् मयि कुप्यसि मयि कोपं करोषि। सर्वस्मिन् अपि सर्वलोकेषु इतरजन्तुषु अपि आत्मानं स्वकीयं ब्रह्मस्वरूपं पश्य अवलोकय। सर्वत्र सर्वविधसंसारव्यवहारेषु भेदज्ञानम् इदं मम इदं तव इत्यादिभेदबुद्धिम् उत्सृज परित्यज।९।

प्राणायामम् अनुलोमविलोमादिव्यापारं प्रत्याहारम् चक्षुः-श्रोत्र-त्वग्-जिह्वा-घ्राणेन्द्रियाणां स्वस्वविषयेभ्यः प्रत्याहरणं नित्यानित्यविवेकविचारं ब्रह्म एव नित्यं वस्तु ततः अन्यद् अखिलम् अनित्यम् इति विचारं जाप्यसमेतसमाधिविधानम् जाप्येन श्रीभगवन्नामस्मरणादिना सह ध्यानादिकम् अवधानं निश्चयज्ञानं महदवधानं महता यत्नेन कुरु सम्पादय।१०।

यथा नलिनीदलगतसलिलं नलिनीदले पद्मपत्रे गतं स्थितं सलिलं जलं तरलं क्षणस्थायि भवति तद्वत् तथैव जीवितं जीवनम् अतिशयचपलम् अत्यन्तं चञ्चलम्। व्याध्यभिमानग्रस्तं व्याधिना कफवित्तादिरोगेण अभिमानेन स्वयशसा च ग्रस्तम् आच्छन्नं शोकगतं दुःखभरितं समस्तम् अखिलं लोकं विश्वं विद्धि जानीहि।११।

व्याख्यानम् -

सर्वं खलु इदं ब्रह्म। सर्वस्मिन् शरीरिणि एकं ब्रह्मैव वर्तते। तेन कस्यचिद् उपरि क्रोधः नाम स्वस्य उपरि एव क्रोधः। क्रोधेन पुनः आत्मज्ञानं भवति विस्मृतम्। तथाह्युच्यते भगवता श्रीकृष्णेन गीतायां-

काम एष क्रोध एष रजोगुणसमुद्भवः।

महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्।। इति।

क्रोधादयः अनर्थकाः। किञ्च सर्वत्र आत्मनः अर्थाद् ब्रह्मत्वेन दर्शनं कार्यम्। ब्रह्मज्ञानेन भेदज्ञानम् इदं मम कृते, इयं मम, इयं तव इत्यादिकं नश्यति। सर्वत्र आत्मोपलब्धये गोविन्दं भज इत्यर्थः।९।

प्राणायामप्रत्याहारादीनाम् अभ्यासः करणीयः। अर्थात् अद्वैतवेदान्तानाम् अष्टाङ्गानां विधिवद् अभ्यासः अपेक्षितः। किञ्च चित्तशुद्ध्यादिकरणाय जपः करणीयः। तेन सह श्रीभगवतः नामस्मरणादिकम् अपि करणीयम्। तेन भगवतः गुणकीर्तनेन मनसि शान्तिः आगच्छति। एतेन महान् यः ब्रह्मप्राप्तिरूपः निश्चयः सः सुतरां भवति। एतादृशं महदवधानं कुरु। अस्य उपलब्धये गोविन्दं भज इति।१०।

पद्मपत्रे जलं क्षणिकं यावत् न तिष्ठति। एवमेव मनुष्याणां जीवनम् अपि अत्यन्तं चञ्चलं नाम अधुना अस्ति परन्तु श्वः नापि स्थातुम् अर्हति। समस्तः अयं संसारः रोगादिना व्यस्तः किञ्च अभिमानप्रीतिद्वेषादिव्याप्तः। अपि च अयं शोकेन परिपूर्णः। अत्र संसारे दुःखमेव सर्वदा लभ्यते, यत्किञ्चित् सुखं प्राप्यते तदपि परं दुःखमेव दास्यति। तस्मात् एतत् सर्वं जानीहि। किञ्च अस्मात् मुक्तिं चिरसुखं प्राप्तुं च त्वं गोविन्दं भज इत्यर्थः।११।

पाठगतप्रश्नाः-३

१३. विष्णुः कुत्र कुत्र अस्ति।

१४. सर्वत्र किम् उत्सृज।

१५. किं किम् अवधानं कार्यम्।

१६. जीवनं कीदृशं भवति।

१७. समस्तः लोकः कीदृशः।

८.५) साम्प्रतं मूलपाठमवगच्छाम (मोहमुद्गरः) - ४

का तेऽष्टादशदेशे चिन्ता वातुल तव किं नास्ति नियन्ता।
यस्त्वां हस्ते सुदृढनिबद्धं बोधयति प्रभवादिविरुद्धम्।। १२
गुरुचरणाम्बुजनिर्भरभक्तः संसारादचिराद् भव मुक्तः।
सेन्द्रियमानसनियमादेवं द्रक्ष्यसि निजहृदयस्थं देवम्।। १३।।
द्वादशपञ्जरिकामय एष शिष्याणां कथितो ह्युपदेशः।
येषां चित्ते नैव विवेकस्ते पच्यन्ते नरकमनेकम्।। १४।।

अन्वयार्थः -

वातुल उन्मत्त जीव, ते तव अष्टादशदेशे बहुषु विषयेषु का कीदृशी चिन्ता व्याकुलता। तव ते नियन्ता प्रभुः किं नास्ति न वर्तते। यः हस्ते पाणिद्वये सुदृढनिबद्धं सम्यक्तया बद्धं त्वां प्रभवादिविरुद्धं प्रभवादिभ्यः जननमरणादिविकारेभ्यः विरुद्धं पृथक् आत्मतत्त्वं बोधयति ज्ञापयिष्यति इति तात्पर्यम्। १२।

गुरुचरणाम्बुजनिर्भरभक्तः गुरुचरणाम्बुजयोः निर्भरः यः भक्तः अर्थाद् गुरुपादपद्मयोः आश्रितः भक्तिमान् यः जनः। अथवा गुरुचरणाम्बुजयोः निर्भरभक्तः निर्भरभक्तियुक्तः परिपूर्णभक्तियुक्तः यः सः अचिरात् शीघ्रमेव संसारात् मायावृतात् मुक्तः पाशरहितः भव। एवं क्रमेण सेन्द्रियमानसनियमात् इन्द्रियैः सह सेन्द्रियस्य मनसः नियमात् संयमात् निजहृदयस्थं स्वस्मिन् अवस्थितम् देवं परमेश्वरं ब्रह्मस्वरूपं द्रक्ष्यसि साक्षात्कर्तुं शक्नोषि।१३।

एषः श्लोकबद्धः द्वादशपञ्जरिकामयः द्वादशपञ्जरिकास्तोत्ररूपः हि निश्चयेन, शिष्याणाम् अन्तेवासिनां कृते कथितः उक्तः उपदेशः कृत्याकृत्यविवेकबोधः। येषां नराणां चित्ते मनसि विवेकः सदसद्विचारः नास्ति नैव कदाचित् भवति ते मूढाः नरकम् अत्यन्तदुःखमूलम् अनेकं बहुवारं पच्यन्ते संसारं प्रविशन्ति।१४।

व्याख्यानम् -

वातुल उन्मत्त जीव, ते तव अष्टादशदेशे बहुषु विषयेषु का कीदृशी चिन्ता व्याकुलता। तव ते नियन्ता प्रभुः किं नास्ति न वर्तते। यः हस्ते पाणिद्वये सुदृढनिबद्धं सम्यक्तया बद्धं त्वां प्रभवादिविरुद्धं प्रभवादिभ्यः जननमरणादिविकारेभ्यः विरुद्धं पृथक् आत्मतत्त्वं बोधयति ज्ञापयिष्यति इति तात्पर्यम्। १२।

वस्तुतस्तु बहुषु विषयेषु चिन्ता व्यर्था एव। अतः अविवेकिनं प्रति इयमुक्तिः- हे मूढ, तव नियन्ता किं नास्ति। यः त्वां हस्तयोः सुदृढं गृहीत्वा जननमरणादिभ्यः विकारेभ्यः पृथग्भूतं भवति ब्रह्मज्ञानं तदेव आत्यन्तिकदुःखनाशकम् इति बोधयिष्यति। तादृशं ब्रह्मज्ञानं प्राप्तव्यं चेद् गोविन्दभजनं कार्यम्।

"गुरोरङ्घ्रिपद्मे मनश्चेन्न लग्नं

ततः किं ततः किं ततः किं ततः किम्।।" इति शङ्कराचार्यवचनादेव ज्ञायते यद् गुरोः पादपद्मयोः भक्तिमान् यः स एव संसारार्णवतरणे सक्षमो भवति। स एव आत्मज्ञानं प्राप्नोति। आत्मज्ञानलाभाय गुरौ सम्पूर्णा भक्तिः गुरुवचस्सु श्रद्धा विश्वासश्च अपेक्षते। अत एव अद्वैतवेदान्ते ब्रह्मज्ञाने अधिकारिणः शमादिषट्कसम्पत्तिः भवेत्। शमादयस्तावत् शमः दमः उपरतिः तितिक्षा समाधानं श्रद्धा च। तत्र श्रद्धा नाम गुरूपदिष्टवेदान्तवाक्येषु विश्वासः। एवं गुरौ श्रद्धावान् भक्तिमान् च संसारात् मायावृतात् जगतः शीघ्रमेव मुक्तिं प्राप्नोति। तस्मात् त्वं तादृशः भूत्वा शीघ्रमेव मोक्षं लभस्व। किञ्च इन्द्रियैः सह मनसः संगमनं नाम निग्रहः अपेक्षते। अर्थात् शमादिसम्पन्नः भव। तेन त्वं स्वस्मिन् स्थितं परमात्मानं द्रष्टुं शक्नोषि। तत्प्राप्त्यर्थं त्वं गोविन्दं भज इति अविवेकिनं प्रति उपदेशः।१३।

इदं स्तोत्रं भगवच्चरणैः श्रीशङ्कराचार्यैः शिष्याणां नाम तेषां साक्षात् शिष्याणां किञ्च परम्परया अस्माकं कृते कृत्याकृत्यविवेकविषये उपदेशमुखेन उक्तम्। ये श्रद्धान्विताः भूत्वा विश्वासं कृत्वा आत्मज्ञानलाभाय यत्नं करिष्यन्ति ते अवश्यं मुक्ताः भविष्यन्ति। परन्तु येषां चित्ते ज्ञानोदयः न भविष्यति ते जननमरणादिचक्रैः बद्धाः सन्तः पुनः पुनः दुःखमूलं संसारम् आगमिष्यन्ति। तस्माद् एतस्मात् संसारदुःखात् मुक्तिं प्राप्तुं त्वं गोविन्दं भज इत्यर्थः।

पाठगतप्रश्नाः-४

१८. कीदृशः नियन्ता अपेक्षते।

१९. कथं जनः संसारात् मुक्तो भवति।

२०. निजहृदयस्थस्य देवस्य दर्शनं कथं लभ्यते।

२१. इदं मोहमुद्गरस्तोत्रं कीदृशम्।

२२. के नरके पच्यन्ते।

८.६) सम्पूर्णः मूलपाठः (श्रीरामगुणवर्णना)

स च नित्यं प्रशान्तात्मा मृदुपूर्वं च भाषते।
उच्यमानोऽपि परुषं नोत्तरं प्रतिपद्यते।। १।।
कदाचिदुपकारेण कृतेनैकेन तुष्यति।
न स्मरत्यपकाराणां शतमप्यात्मवत्तया।। २।।
शीलवृद्धैर्ज्ञानवृद्धैर्वयोवृद्धैश्च सज्जनैः।
कथयन्नास्त वै नित्यमस्त्रयोग्यान्तरेष्वपि।। ३।।
बुद्धिमान्मधुराभाषी पूर्वभाषी प्रियंवदः।
वीर्यवान्न च वीर्येण महता स्वेन विस्मितः।। ४।।
न चानृतकथो विद्वान्वृद्धानां प्रतिपूजकः।
अनुरक्तः प्रजाभिश्च प्रजाश्चाप्यनुरञ्जते।। ५।।
कुलोचितमतिः क्षात्रं स्वधर्मं बहु मन्यते।
मन्यते परया प्रीत्या महत्स्वर्गफलं ततः।। ६।।
नाश्रेयसि रतो यश्च न विरुद्धकथारुचिः।
उत्तरोत्तरयुक्तीनां वक्ता वाचस्पतिर्यथा।। ७।।
अरोगस्तरुणो वाग्मी वपुष्मान्देशकालवित्।
लोके पुरुषसारज्ञः साधुरेको विनिर्मितः।। ८।।
धर्मकामार्थतत्त्वज्ञः स्मृतिमान्प्रतिभानवान्।
लौकिके समयाचारे कृतकल्पो विशारदः।। ९।।
निभृतः संवृताकारो गुप्तमन्त्रः सहायवान्।
अमोघक्रोधहर्षश्च त्यागसंयमकालवित्।। १०।।
रामः सत्पुरुषो लोके सत्यः सत्यपरायणः।
साक्षाद्रामाद्विनिर्वृत्तो धर्मश्चापि श्रिया सह।। ११।।

८.७) साम्प्रतं मूलपाठमवगच्छाम - (श्रीरामगुणवर्णना-१)

स च नित्यं प्रशान्तात्मा मृदुपूर्वं च भाषते।
उच्यमानोऽपि परुषं नोत्तरं प्रतिपद्यते।। १।।
कदाचिदुपकारेण कृतेनैकेन तुष्यति।

न स्मरत्यपकाराणां शतमप्यात्मवत्तया।। २।।
शीलवृद्धैर्ज्ञानवृद्धैर्वयोवृद्धैश्च सज्जनैः।
कथयन्नास्त वै नित्यमस्त्रयोग्यान्तरेष्वपि।। ३।।
बुद्धिमान्मधुराभाषी पूर्वभाषी प्रियंवदः।
वीर्यवान्न च वीर्येण महता स्वेन विस्मितः।। ४।।

अन्वयार्थः -

स श्रीरामचन्द्रः च नित्यं सततं प्रशान्तात्मा अक्रोधनस्वभावः मृदुपूर्वं मृदुक्तिपूर्वं च भाषते वक्ति। परुषम् रूक्षम् उच्यमानः कोऽपि कटुक्तिं करोति चेदपि स न नैव परुषम् उत्तरं रूक्षस्वरेण प्रत्युत्तरं प्रतिपद्यते प्रयच्छति इत्यर्थः।१।

एकेन केनापि पुरुषेण कदाचित् कुत्रापि केनापि प्रकारेण उपकारेण सौकर्यविधानेन कृतेन कुर्वता अपि तुष्यति आत्मवत्तया स्वदिव्यदेहवत्तया स्वीकरोति। सः अपकाराणां दुःखं दत्तवतां शतम् अपि बहु अपराधम् अपि आत्मवत्तया स्वदेहवत्तया न स्मरति विस्मरति इत्यर्थः।२।

नित्यं सर्वदा शीलवृद्धैः सदाचारसम्पन्नैः ज्ञानवृद्धैः विद्या येषां परिपक्वाः सम्पन्नाः तादृशैः, वयोवृद्धैः ज्येष्ठैः, सज्जनैः सत्पुरुषैः, अस्त्रयोग्यान्तरेषु अस्त्रयोग्यस्य अन्तरेषु मध्यकालेषु अस्त्रविद्याभ्याससमये अपि वै निश्चयेन कथयन् आस्त वदति स्म इत्यर्थः।३।

स रामचन्द्रः बुद्धिमान् सर्वविधवचनविषयेषु प्रशस्तबुद्धिविशिष्टः, मधुराभाषी मधुरं मनोहरम् आभाषितुं शीलम् अस्य मधुरवचनशाली, पूर्वभाषी प्रथमभाषणेन स्वाभिमुख्यप्रदर्शकः, प्रियंवदः सत्यभाषी परन्तु प्रियवाक्यस्य वक्ता, वीर्यवान् बलशाली, परन्तु स्वेन स्वकीयेन महता प्रबलेन वीर्येण पराक्रमेण न विस्मितः आत्मबोधविहीनः न इत्यर्थः।४।

व्याख्यानम् -

अत्र श्रीरामचन्द्रस्य गुणवर्णना क्रियते। स श्रीरामः सर्वदा शान्तमनस्कः भूत्वा एव तिष्ठति। किञ्च कदापि किमपि वक्तव्यं चेत् क्रोधादिकम् अकृत्वा कोमलस्वरेण सम्भाषते। यदि कदापि कश्चन तेन सह कठोरवचनेन भाषणं करोति तदापि स तेन सह कोमलशब्दैः ललितवाक्यैः भाषते। एवं श्रीरामः स्वभावेन शान्तः मृदुभाषी च।१।

कश्चन सामान्यजनः अपि यदि तस्य कमपि उपकारं कदापि कुत्रापि करोति तर्हि स श्रीरामः तं कदापि न विस्मरति। किन्तु बहवः यदि तस्य अपकारं कुर्वन्ति, तस्य दुःखं जनयन्ति, तथापि स कृपासिन्धुः स्वस्य माहात्म्येन तान् प्रति कदापि क्रोधं न करोति। तेषाम् अपकारान् अपि विस्मरति। अत्र भगवतः श्रीरामचन्द्रस्य उदारतायाः परिचयः प्राप्यते।२।

रामचन्द्रः सर्वदा सदाचारसम्पन्नैः पूज्यैः सह वार्तालापेन तेभ्यः सदाचारज्ञानम् अलभत। एवमेव येषां विद्याः परिपक्वाः तादृशैः सह वार्तालापेन तेभ्यः विविधशास्त्राणां ज्ञानम् अलभत। ये वयसा ज्येष्ठः अर्थाद् जीवने विविधविषये अभिज्ञतां ये लब्धवन्तः तेभ्यः कस्मिन् परिस्थितौ कथं स्थेयम् इत्यादिविषये

ज्ञानम् अलभत। किञ्च, ये सत्पुरुषाः तेभ्यः नीत्युपदेशान् लब्धवान्। स श्रीरामः एतैः सह अस्त्राभ्यासकाले अपि वार्तालापं कुर्वन्ति स्म। एवं सर्वान् प्रति तस्य श्रद्धा परिस्फुटा भवति।३।

रामचन्द्रस्य कथं कदा किं वक्तव्यम् इत्यस्मिन् विषये विशिष्टबुद्धिः आसीत्। अतः स व्यवहारेषु प्रशस्तबुद्धिविशिष्टः। तस्य मधुरभाषणमेव स्वभावः अतः स मधुराभाषी। अपि च, प्रियवाक्कथने निपुणः स यदा अतिनीचेन सहापि वार्ताम् आलपति स्म तदा आदौ सम्भाष्य सः अपरस्य आभिमुख्यं सम्पादयति स्म। सः अत्यन्तबलशाली भूत्वा अपि स्वकीयेन महता बलेन आत्मबोधविहीनः अन्धः न आसीत्। अत्र श्रीरामस्य महत्त्वं ज्ञायते।।४।

पाठगतप्रश्नाः-५

२३. स रामचन्द्रः कथं भाषते।

२४. रामचन्द्रं प्रति परुषवचः उच्यते चेत्स किं करोति।

२५. श्रीरामचन्द्रः किं न स्मरति।

२६. श्रीरामचन्द्रः कथं न स्मरति।

२७. श्रीरामः कथं तुष्यति।

२८. श्रीरामः कैः सह अस्त्राभ्यासकाले अपि कथयन्नास्त।

८.८) साम्प्रतं मूलपाठमवगच्छाम (श्रीरामगुणवर्णना-२)

न चानृतकथो विद्वान्वृद्धानां प्रतिपूजकः।
अनुरक्तः प्रजाभिश्च प्रजाश्चाप्यनुरञ्जते।। ५।।
कुलोचितमतिः क्षात्रं स्वधर्मं बहु मन्यते।
मन्यते परया प्रीत्या महत्स्वर्गफलं ततः।। ६।।
नाश्रेयसि रतो यश्च न विरुद्धकथारुचिः।
उत्तरोत्तरयुक्तीनां वक्ता वाचस्पतिर्यथा।। ७।।
अरोगस्तरुणो वाग्मी वपुष्मान्देशकालवित्।
लोके पुरुषसारज्ञः साधुरेको विनिर्मितः।। ८।।

अन्वयार्थः -

न च अनृतकथः अनृता मृषा कथा कथनं यस्य स श्रीरामचन्द्रः अनृतकथः मिथ्यावादी कदापि मिथ्याभाषणं न करोति। विद्वान् सकलज्ञानविशिष्टः स वृद्धानां ज्ञानादिभिः वृद्धिं गतानां प्रतिपूजकः पूजादानादिभिः सम्मानकर्ता। स प्रजाभिः देशस्थैः जनैः अनुरक्तः अनुरागविषयीभूतः। कुत इति चेत्-प्रजाः च अपि प्रजाजनान् अपि स श्रीरामः अनुरञ्जते अनुरञ्जयति।५।

कुलोचितमतिः कुलोचिता इक्ष्वाकुकुलयोग्या मतिः बुद्धिः यस्य सः स्वकुलयोग्यबुद्धिसम्पन्नः श्रीरामचन्द्रः क्षात्रं क्षत्रियपालनीयं प्रजापालनादिकं स्वधर्मं स्वकर्तव्यं बहु अधिकं मन्यते पालयति। तत्र आधिक्ये हेतुः तावत् - ततः प्रजापालनादिरूपात् क्षात्रधर्मात् परया प्रीत्या महत्या श्रद्धया महद् अत्युत्कृष्टं स्वर्गफलं देवलोकप्राप्तिरूपफलं मन्यते निश्चिनोति।६।

यः श्रीरामचन्द्रः अश्रेयसि निष्फले अकल्याणे कर्मणि न रतः आसक्तः, न च विरुद्धकथारुचिः विरुद्धकथासु धर्मविरुद्धग्राम्यालापादिषु प्रीतिरहितः स उत्तरोत्तरयुक्तीनां वादादिषु स्वपक्षनिर्वाहकोत्तरोत्तरयत्ने वाचस्पतिर्यथा वाचस्पतिरिव वक्ता अप्रतिहतवक्ता।७।

स श्रीरामचन्द्रः अरोगः रोगादिसंसर्गरहितः, तरुणः नित्यतारुण्यविशिष्टः, वाग्मी प्रशस्तवचनवान्, वपुष्मान् प्रशस्तशरीरः, देशकालवित् लौकिकवैदिककर्मोचित-देशकालयोः ज्ञाता, लोके पुरुषसारज्ञः पुरुषसारान् पुरुषस्य अन्तर्गूहितं तत्त्वं जानाति इति पुरुषसारज्ञः, साधुः परकार्यसाधनशीलः, विनिर्मितः विशेषेण विलक्षणत्वेन निर्मितः अर्थाद् अघटितघटनापटीयान्।८।

व्याख्यानम् -

अत्रापि भगवतः श्रीरामचन्द्रस्य महिमाकथनं क्रियते। स कदापि मिथ्याभाषणं न करोति। सर्वविधज्ञानसम्पन्नः स परन्तु ये वयोज्येष्ठाः किञ्च ज्ञानज्येष्ठाः आचारज्येष्ठाश्च तेषां सम्मानं सेवादिकं च करोति। स सर्वेषां प्रजानाम् अनुरागविषयीभूतः भवति। कुतः इति चेदुच्यते यत् सः प्रजाजनान् अनुरञ्जयति। स स्वयं पूर्वं प्रजानामनुरञ्जनं करोति। ततः अनुरञ्जिताभिः प्रजाभिः अनुरक्तः भवति।५।

स श्रीरामः स्वस्य इक्ष्वाकुकुलस्य विषये ज्ञानसम्पन्नः आसीत्। तस्य मतिः सूक्ष्मविचारसहिता इक्ष्वाकुकुलयोग्या। स स्वस्य प्रजापालनादिरूपं क्षत्रियधर्मं अत्यन्तं श्रद्धया पालयति। यतो हि क्षत्रियधर्मस्य श्रद्धया पालनेन महत्स्वर्गफलं लभ्यते इति स चिन्तयति।६।

द्युतक्रीडादेः यस्य कर्मणः किमपि महत् फलं नास्ति तादृशं कर्म श्रीरामः न कदापि आचरति। धर्मप्रसङ्गं त्यक्त्वा ग्रामालापादिकं स न कदापि करोति। यदा विविधशास्त्राणि आधारीकृत्य वादः प्रचलति तदा तत्र स वाचस्पति इव अप्रतिहतवक्ता। अर्थाद् वादादिषु न कश्चित् तं पराजेतुं शक्नोति।७।

तस्य श्रीरामस्य शरीरं सर्वदा ज्वरादिरोगरहितं भवति। सर्वदा तारुण्यं तस्य अङ्गेषु प्रतिभाति। तस्य देहः सुदृढः। अपि च लौकिकवैदिककर्माणि कस्मिन् काले कथं करणीयानि इति विषये सम्यक्तया जानाति स्म। कश्चन पुरुषः अन्तः किं चिन्तयति इति स एकवारं तं पुरुषं दृष्ट्वा ज्ञातुं शक्नोति। तस्मात् स साधुः इव अन्तर्यामी इति ज्ञायते।८।

पाठगतप्रश्नाः-६

२९. श्रीरामः केषां प्रतिपूजकः - क) प्रजानाम्, ख) अमात्यानाम्, ग) वृद्धानाम्, घ) योगिनाम्

३०. रामचन्द्रः कथं प्रजाभिः अनुरक्तो भवति।

३१. रामचन्द्रः कान् अनुरञ्जते।



३२. रामचन्द्रः किं बहु मन्यते।

३३. रामचन्द्रः कस्मिन् न रतः।

३४. रामचन्द्रः कीदृशः वक्ता आसीत्।

३५. रामचन्द्रः लोके कीदृशः अस्ति।

३६. पुरुषसारज्ञः इत्यस्य किं तात्पर्यम्।

८.९) साम्प्रतं मूलपाठमवगच्छाम (श्रीरामगुणवर्णना-३)

धर्मकामार्थतत्त्वज्ञः स्मृतिमान्प्रतिभानवान्।
लौकिके समयाचारे कृतकल्पो विशारदः।। ९।।
निभृतः संवृताकारो गुप्तमन्त्रः सहायवान्।
अमोघक्रोधहर्षश्च त्यागसंयमकालवित्।। १०।।
रामः सत्पुरुषो लोके सत्यः सत्यपरायणः।
साक्षाद्रामाद्विनिर्वृत्तो धर्मश्चापि श्रिया सह।। ११।।

अन्वयार्थः -

स श्रीरामचन्द्रः धर्मकामार्थतत्त्वज्ञः धर्मकामार्थानां तत्त्वं जानाति पुरुषार्थतत्त्वविद् इत्यर्थः। स स्मृतिमान् ज्ञातार्थविषये विस्मरणरहितः, प्रतिभावान् प्रतिभानं प्रतिवस्तुप्रकाशनं तद्वान्, लौकिके लोकिकप्रमाणे समयाचारे साङ्केतिकाचारे च कृतकल्पः कृतसंस्थापनः विशारदः आचरणसमर्थः।९।

निभृतः विनीतः, संवृताकारः संवृतः आकारो यस्य स कर्तव्यार्थव्यञ्जकेङ्गिताकारगोपनचतुरः, गुप्तमन्त्रः फलपर्यन्तम् अन्यैः अविदितमन्त्रः, सहायवान् प्रशस्तमन्त्रयुक्तः, अमोघक्रोधहर्षः अमोघौ निष्फलौ क्रोधहर्षौ यस्य स फलपर्यवसायिकोपप्रसादः, त्यागसंयमकालवित् त्यागसंयमयोः दानग्रहणयोः कालं वेत्ति जानातीति त्यागसंयमकालविद् वस्तुत्यागग्रहणकालवेत्ता भवति।१०।

रामः दाशरथिः लोके जगति सत्पुरुषः सज्जनः सत्यः सत्यवान् सत्यपरायणः सत्यधर्मैकनिष्ठः। धर्मः क्षात्रधर्मः श्रिया सह तत्फलभूतया सम्पदा सह रामात् श्रीरामचन्द्रात् साक्षात् अव्यवधानेन विनिर्वृत्तः निष्पन्नः धर्मार्थियोः इतरनिरपेक्षतया निर्वाहकः स इत्यर्थः।११।

व्याख्यानम् -

धर्मार्थकाममोक्षाः चत्वारः पुरुषार्थाः। तेषां विषये श्रीरामस्य ज्ञानमतीव गभीरम्। स यद् एकवारम् अवगच्छति तत् न कदापि विस्मरति। कस्यापि वस्तुनः प्रकाशने तस्य अभिनवसामर्थ्यं वर्तते। किञ्च यथासमयं वैदिकलौकिककर्मादीनाम् आचरणे तस्य सामर्थ्यम् अनुपमम्। अर्थात् स वैदिकलौकिककर्मादीनाम् आचरणे अतीव निपुणः। एवमत्र श्रीरामचन्द्रस्य सर्वेषु कार्येषु सामर्थ्यमस्तीति स्फुटम्।९।

स श्रीरामः विनयसम्पन्नः। कस्यापि कार्यस्य सिद्ध्यर्थम् इङ्गितादिकम् अपेक्षते, अन्यथा तस्य कार्यस्य विघ्नः सम्भवेत्। स तादृशेङ्गितस्य गोपने दक्षः। किञ्च, कस्यापि कर्मणः यावत् फलं न भवति तावत् तस्य मन्त्रणादिकं तं परित्यज्य अन्यः कश्चिद् अपि ज्ञातुं नैव शक्नोति। अपि च तस्य मन्त्रणम् अतीवयुक्तिसम्मतं भवति। न केवलम् एतदेव, स क्रोधं वा हर्षं वा करोति चेत् स कदापि निष्फलः न भवति। अपि च स कदा कस्य त्यागः कदा कस्य ग्रहणं वा कर्तव्यम् इत्यस्मिन् विषये विलक्षणबुद्धिसम्पन्नः अस्ति।१०।

स श्रीरामचन्द्रः लोके अत्यन्तः सज्जनः। अर्थात् तस्य स्वशत्रौ अपि स्नेहः अस्ति। सः सत्यस्वरूपः सत्यपरायणश्च। सत्यधर्मस्य परिपालनं स सर्वदा करोति। किञ्च स राजश्रिया सह स्वधर्मस्य निर्वहनं सम्यक्तया करोति।११।

पाठगतप्रश्नाः-७

३७. धर्मकामार्थतत्त्वज्ञः इत्यस्य किं तात्पर्यम्।

३८. रामचन्द्रः कुत्र कृतकल्पः।

३९. रामचन्द्रः लोके कीदृशः

४०. श्रीरामः किंपरायणः- क) धर्मपरायणः, ख) ध्यानपरायणः, ग) सत्यपरायणः, घ) प्रजाकल्याणपरायणः।

४१. श्रीरामस्य धर्मः केन सह विनिर्वृत्तः - क) पत्न्या सह, ख) मन्त्रिभिः सह, ग) श्रिया सह, घ) भुवा सह।

पाठसारः

परमकारुणिकाः भगवन्तः श्रीशङ्कराचार्याः सर्वेषां कृते ज्ञानोदयार्थम् इदं द्वादशपञ्जरिकास्तोत्रं रचितवन्तः। अस्मिन् स्तोत्रे प्रतिपदं ते संसारस्य अनित्यता, तत्र दुःखमेव मूलम्, एतस्मात् मुक्तये गोविन्दस्य अर्थात् परब्रह्मणः भजनं कार्यम् इत्युपदेशं दत्तवन्तः। स्तोत्रात् साररूपेण एवं ज्ञायते यत् - धनजनस्त्रीपुत्रादिषु आत्मबुद्धिः नैव करणीया। यतो हि केनापि सह कस्यापि सम्बन्धः क्षणिक आभासश्च। तस्मात् संसारविषयेषु अहम्भावः न स्यात्। किञ्च यावत् सत्कर्मणा उपार्जनं क्रियते तेन स्वस्य जीवनयापनं कर्तव्यम्। ये खलु कामक्रोधादिभिः मत्ताः, ते चिन्तयन्ति यत् जगत् तेषाम् अधीने वर्तते इति। एवंविधाः अज्ञानिनः प्रत्यहं दुःखैः बहुधा दुःखिताः सन्तः नरककष्टम् अनुभवन्ति। सर्वदा समचित्तो भवेत्। अर्थात् सुखे दुःखे कदापि लिप्तेन न भवितव्यम् इति। किञ्च, जीवनमिदं पद्मपत्रे स्थितं जलमिव। कदा गमिष्यति किं वा भविष्यति इति न कश्चन वक्तुं शक्नोति। तस्मात् शीघ्रमेव

आत्मचिन्तनेन ब्रह्मस्वरूपावाप्तिरूपः मोक्षः साधनीयः। इदं स्तोत्रं पठित्वा यः गुरौ श्रद्धावान् भूत्वा ब्रह्मज्ञानलाभाय प्रयत्नं कुर्यात् तस्य अनन्तसुखप्राप्तिः मुक्तिश्च भवेद् इति भगवतां शङ्कराचार्यपादानामाशयः।

पाठस्यास्य द्वितीयः भागः श्रीरामगुणवर्णना महामुनिना वाल्मीकिमहर्षिणा विरचिते रामायणाख्ये महाकाव्ये अस्ति। तत्र दशरथपुत्रस्य श्रीरामचन्द्रस्य गुणवर्णना क्रियते। तत्र चितांशस्य सारः तावत् - स श्रीरामः सर्वदा प्रशान्तचित्तः भवति। स कदापि केनापि सह कठोरभाषणं न करोति। स सर्वदा मधुरं प्रियं च वाक्यं व्यवहरति। नीचजनेषु अपि तस्य समानप्रीतिः वर्तते। कदापि कश्चित् तस्य किमपि उपकारं करोति चेत् स सर्वदा तं स्मरति। किञ्च बहवः तस्य अपकारान् कुर्वन्ति चेदपि सः तान् न स्मरति। सर्वान् प्रति तस्य श्रद्धा अस्ति। स वृद्धानां वाक्यं श्रुत्वा जीवनं परिपालयति। तस्य महान् पराक्रमः वर्तते परन्तु निष्प्रयोजनं तस्य पराक्रमस्य प्रकाशं न करोति। स्वस्य धर्मस्य परिपालनम् अपि स सम्यक्तया करोति। द्युतादिक्रीडया स कालव्ययं न करोति। स यदि वादेषु प्रवृत्तः भवति तदा तस्य पराजयः असम्भवः अस्ति। किञ्च स एवं शुद्धचित्तः यत् यः कश्चित् पुरुषः मनसि यत् किमपि चिन्तयति, स तत् ज्ञातुं शक्नोति। राज्यपरिपालनस्य कौशलम् अपि स सम्यक्तया वेत्ति। तस्य मन्त्रणं यावत् कर्मणः फलं न आयाति तावत् नैव ज्ञातुं शक्यते। अपि च सर्वदा सत्यस्य पालनं करोति। शत्रुं प्रति अपि तस्य द्वेषः नास्ति, अपि तु स्नेहः एव अस्ति। स सम्पदा सह धर्मस्य निर्वाहकः। एवमेव भगवतः श्रीरामस्य माहात्म्यं प्रतिपादितम्।

पाठान्तप्रश्नाः

४२. "मूढ जहीहि धनागमतृष्णाम्" इति श्लोकं प्रपूर्य व्याख्यात।
४३. "कामं क्रोधं लोभं मोहम्" इति श्लोकं प्रपूर्य व्याख्यात।
४४. "मा कुरु धनजनयौवनगर्वम्" इति श्लोकं प्रपूर्य व्याख्यात।
४५. "सुरमन्दिरतरुमूलनिवासः" इति श्लोकं प्रपूर्य व्याख्यात।
४६. "गुरुचरणाम्बुजनिर्भरभक्तः" इति श्लोकं प्रपूर्य व्याख्यात।
४७. मोहमुद्गरः इति स्तोत्रस्य सारं प्रतिपादयत।
४८. "शीलवृद्धैर्ज्ञानवृद्धैः" इति श्लोकं प्रपूर्य व्याख्यात।
४९. "बुद्धिमान् मधुराभाषी" इति श्लोकं प्रपूर्य व्याख्यात।
५०. "कुलोचितमतिः" इति श्लोकं प्रपूर्य व्याख्यात।
५१. "अरोगस्तरुणो" इति श्लोकं प्रपूर्य व्याख्यात।
५२. "धर्मकामार्थतत्त्वज्ञः" इति श्लोकं प्रपूर्य व्याख्यात।
५३. "श्रीरामगुणवर्णना" इति पाठ्यांशस्य सारं प्रतिपादयत।



पाठगतप्रश्नानामुत्तराणि

उत्तराणि-१

१. सन्निहिते मरणे डुकृञ् करणे इत्यादिव्याकरणशास्त्रादिकं न रक्षति।

२. मूढेन धनागमतृष्णा त्यक्तव्या।

३. अर्थात् सुखलेशः अपि न प्राप्यते। अर्थः यदा तिष्ठति स्वपुत्रादपि अपहरणादिभीतिः उत्पद्यते। अतः अर्थः अनर्थः भवति।

४. स्वकर्मणा उपार्जितेन धनेन चित्तं विनोदनीयम्।

५. सर्वत्र एषा नीतिःविहिता यद् धनिकानां पुत्रादेः "अयं मम सर्वस्वम् अपहरेत्" इत्यादिभीतिः भवति।

६. कान्ता पुत्रः इत्यादिसम्बन्धः सर्वः अनित्यः एव। परन्तु संसारे तादृश-सम्बन्धः नित्यत्वेन भासमानः, अतः मायावृतः संसारः विचित्रः।

उत्तराणि-२

७. धनजनयौवनानां गर्वः न करणीयः। यतो हि कालः निमिषेण धनजनयौवनानि हर्तुं समर्थः।

८. कामं क्रोधं लोभं मोहं त्यक्त्वा आत्मनः चिन्ता कर्तव्या।

९. सुरमन्दिरे तरुमूले वा निवासः, भूतलं शय्या, मृगचर्म, विषयभोगे वितृष्णा यदा भवति तदा एव जनः विरागसुखं लभते।

१०. विरागः सर्वस्य सुखं करोति।

११. शत्रौ मित्रे पुत्रे बन्धौ च विग्रहसन्धौ यत्नः न करणीयः।

१२. विष्णुत्वप्राप्तये अरौ मित्रे सुते स्वजने च विग्रहसन्धौ च प्रयत्नः नैव करणीयः। सर्वत्र समचित्तः भूत्वा विष्णुत्वप्राप्तये स्थेयः।

उत्तराणि-३

१३. त्वयि मयि चान्यत्र अर्थात् सर्वत्र विष्णुः अस्ति।

१४. सर्वत्र इदं मम इदं तव इत्यादिभेदबुद्धिम् उत्सृज।

१५. प्राणायामः, प्रत्याहारः, ब्रह्म एव नित्यं वस्तु ततः अन्यद् अखिलम् अनित्यम् इति नित्यानित्यविवेकविचारः, जाप्यसमेतसमाधिविधानं च जाप्य महदवधानं कार्यम्।

१६. यथा पद्मपत्रे स्थितं सलिलं क्षणस्थायि भवति तद्वत् तथैव जीवनम् अत्यन्तं चञ्चलम्।

१७. व्याध्यभिमानग्रस्तः दुःखभरितः अखिलः लोकः।

उत्तराणि-४

१८. यः पाणिद्वयं गृहीत्वा जननमरणादिविकारेभ्यः विरुद्धं पृथक् आत्मतत्त्वं बोधयिष्यति।

१९. गुरुचरणाम्बुजनिर्भरभक्तः जनः संसारात् मुक्तो भवति।

२०. इन्द्रियैः सह मनसः संयमात् निजहृदयस्थस्य देवस्य दर्शनं भविष्यति।

२१. इदं मोहमुद्‌गरस्तोत्रं शिष्याणां कृते उपदेशरूपम्।

२२. येषां चित्ते विवेको नास्ति ते नरके पच्यन्ते।

उत्तराणि-५

२३. स रामचन्द्रः मृदुपूर्वं भाषते।

२४. रामचन्द्रं प्रति परुषवचः उच्यते चेदपि स पुरुषतया उत्तरं न प्रयच्छति।

२५. श्रीरामचन्द्रः शतमपि अपकारान् न स्मरति।

२६. श्रीरामचन्द्रः आत्मवत्तया अपकारान् न स्मरति।

२७. श्रीरामः एकेनापि उपकारेण तुष्यति।

२८. श्रीरामः शीलवृद्धैः ज्ञानवृद्धैः वयोवृद्धैः सज्जनैः सह अस्त्राभ्यासकाले अपि कथयन्नास्त।

उत्तराणि-६

२९. ग) वृद्धानाम्।

३०. रामचन्द्रः प्रजाः अनुरञ्जयति अतः स प्रजाभिः अनुरक्तो भवति।

३१. रामचन्द्रः प्रजाजनान् अनुरञ्जते।

३२. रामचन्द्रः स्वधर्मं क्षात्रं बहु मन्यते।

३३. रामचन्द्रः निष्फले कर्मणि न रतः।

३४. रामचन्द्रः वाचस्पतिरिव वक्ता आसीत्।

३५. रामचन्द्रः लोके पुरुषसारज्ञः अस्ति।

३६. पुरुषसारज्ञः पुरुषस्य सारं जानाति यः स पुरुषसारज्ञः। अर्थात् पुरुषस्य हृदयस्थं भावं जानाति इति।

उत्तराणि-७

३७. धर्मकामार्थतत्त्वज्ञः नाम धर्मार्थकामानां तत्त्वं यः जानाति। पुरुषार्थविद् इति तात्पर्यम्।

३८. रामचन्द्रः लौकिके समायाचारे च कृतकल्पः।

३९. रामचन्द्रः लोके सत्पुरुषः।

४०. ग) सत्यपरायणः।

४१. ग) श्रिया सह।

॥ इति अष्टमः पाठः ॥